# Shri Hanumat StavarAja

# શ્રીહનુમત્સ્તવરાજઃ

## Document Information

Text title : HanumAn Stavaraja

File name : hanumatstavarAjaH.itx

Category : stavarAja, hanumaana

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 113

Latest update : May 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# શ્રીહનુમત્સ્તવરાજઃ

શ્રીપરાશરઃ ।
અન્યત્સ્તોત્રં પ્રવક્ષ્યામિ શ‍ૃણુ મૈત્રેય યોગિરાટ્ ।
સ્ત્વરાજમિતિ ખ્યાતં ત્રિષુ લોકેષુ દુર્લભમ્ ॥

શમ્ભુના ચોપદિષ્ટં ચ પાર્વત્યૈ હિતકામ્યયા ।
સર્વકામપ્રદં નૃણાં ભુક્તિમુક્તિફલપ્રદમ્ ॥

અસ્ય શ્રીહનુમત્ સ્તવરાજસ્તોત્રમન્ત્રસ્ય વશિષ્ઠ ભગવાન્ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીહનુમાન્ દેવતા । હ્રાં બીજમ્ । હ્રીં શક્તિઃ ।
હ્રૂં કીલકમ્ । મમ શ્રીહનુમત્પ્રસાદસિધ્યર્થે જપે વિનિયોગઃ ॥

અથ ઋષ્યાદિન્યાસઃ ।
શ્રીવશિષ્ઠભગવાન્ ઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીહનુમાન્ દેવતાયૈ નમઃ હૃદિ ।
હ્રાં બીજાય નમઃ ગુહ્યે ।
હ્રીં શક્તયે નમઃ પાદયોઃ ।
હ્રૂં કીલકાય નમઃ નાભૌ ।
મમ શ્રીહનુમત્પ્રસાદસિધ્યર્થે ઇતિ વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

ઇતિ ઋષ્યાદિન્યાસઃ ॥

અથ કરન્યાસઃ ।
ૐ અઞ્જનાસુતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ૐ વાયુપુત્રાય મધ્યમાભ્યાં નમઃ ।
ૐ અગ્નિગર્ભાય અનામિકાભ્યાં નમઃ ।
ૐ રામદૂતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ પઞ્ચમુખહનુમતે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

ઇતિ કરન્યાસઃ ।
અથ ષડઙ્ગન્યાસઃ ।
ૐ અઞ્જનાસુતાય હૃદયાય નમઃ ।
ૐ રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ વાયુપુત્રાય શિખાયૈ વષટ્ ।
ૐ અગ્નિગર્ભાય કવચાય હુમ્ ।
ૐ રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ૐ પઞ્ચમુખહનુમતે અસ્ત્રાય ફટ્ ।
ઇતિ ષડઙ્ગન્યાસઃ ॥

અથ ધ્યાનમ્ ।
ઉદ્યન્માર્તાણ્ડકોટિપ્રકટરુચિકરં ચારુ વીરાસનસ્થં
મૌઞ્જીયજ્ઞોપવીતાભરણમુરુશિખાશોભિતં કુણ્ડલાઙ્ગમ્ ।
ભક્તાનામિષ્ટદં તં પ્રણુત મુનિજનં વેદનાદપ્રમોદં
ધ્યાયેદ્દેવં વિધેયં પ્લવગકુલપતિં ગોષ્પદીભૂતવાર્ધિમ્ ॥

ઇતિ ધ્યાનમ્ ॥

શ્રીહનુમાન્મહાવીરો વીરભદ્રવરોત્તમઃ ।
વીરશ્શક્તિમતાં શ્રેષ્ઠો વીરેશ્વરવરપ્રદઃ ॥ ૧॥

યશસ્કરઃ પ્રતાપાઢ્યો સર્વમઙ્ગલ સિદ્ધિદઃ ।
સાનન્દમૂર્તિર્ગહનો ગમ્ભીરસ્સુરપૂજિતઃ ॥ ૨॥

દિવ્યકુણ્ડલભૂષાય દિવ્યાલઙ્કારશોભિને ।
પીતામ્બરધરપ્રાજ્ઞ નમસ્તે બ્રહ્મચારિણે ॥ ૩॥

કૌપીનવસનાક્રાન્ત દિવ્યયજ્ઞોપવીતિને ।
કુમારાય પ્રસન્નાય નમસ્તે મૌઞ્જીધારિણે ॥ ૪॥

સુભદ્રશ્શુભદાતા ચ સુભગો રામસેવકઃ ।
યશઃપ્રદો મહાતેજા બલાઢ્યો વાયુનન્દનઃ ॥ ૫॥

જિતેન્દ્રિયો મહાબાહુર્વજ્રદેહો નખાયુધઃ ।
સુરાધ્યક્ષો મહાધુર્યઃ પાવનઃ પવનાત્મજઃ ॥ ૬॥

બન્ધમોક્ષકરશ્શીઘ્રપર્વતોત્પાટનસ્તથા ।
દારિદ્ર્યભઞ્જનશ્શ્રેષ્ઠસ્સુખભોગપ્રદાયકઃ ॥ ૭॥

વાયુજાતો મહાતેજાઃ સૂર્યકોટિસમપ્રભઃ ।
સુપ્રભા દીપ્તિમદ્ભૂત દિવ્યતેજસ્વિને નમઃ ॥ ૮॥

અભયઙ્કરમુદ્રાય અપમૃત્યુવિનાશિને ।
સઙ્ગ્રામે જયદાત્રે ચ અવિઘ્નાય નમોનમઃ ॥ ૯॥

તત્ત્વજ્ઞાનામૃતાનન્દબ્રહ્મજ્ઞો જ્ઞાનપારગઃ ।
મેઘનાદપ્રમોહાય હનુમદ્બ્રહ્મણે નમઃ ॥ ૧૦॥

રુચ્યાઢ્યદીપ્તબાલાર્કદિવ્યરૂપશુશોભિતઃ ।
પ્રસન્નવદન શ્રેષ્ઠ હનુમન્ તે નમો નમઃ ॥ ૧૧॥

દુષ્ટગ્રહવિનાશશ્ચ દૈત્યદાનવભઞ્જનઃ ।
શાકિન્યાદિભૂતહન્ત્રે નમોઽસ્તુ શ્રીહનૂમતે ॥ ૧૨॥ શાકિન્યાદિષુ ભૂતઘ્નો
મહાધૈર્ય મહાશૌર્ય મહાવીર્ય મહાબલ ।
અમેયવિક્રમાયૈવ હનુમન્ વૈ નમોઽસ્તુતે ॥ ૧૩॥

દશગ્રીવકૃતાન્તાય રક્ષઃકુલવિનાશિને ।
બ્રહ્મચર્યવ્રતસ્થાય મહાવીરાય તે નમઃ ॥ ૧૪॥

ભૈરવાય મહોગ્રાય ભીમવિક્રમણાય ચ ।
સર્વજ્વરવિનાશાય કાલરૂપાય તે નમઃ ॥ ૧૫॥

સુભદ્રદ સુવર્ણાઙ્ગ સુમઙ્ગલ શુભઙ્કર ।
મહાવિક્રમ સત્વાઢ્ય દિઙ્મણ્ડલસુશોભિત ॥ ૧૬॥

પવિત્રાય કપીન્દ્રાય નમસ્તે પાપહારિણે ।
સુવિદ્યરામદૂતાય કપિવીરાય તે નમઃ ॥ ૧૭॥

તેજસ્વી શત્રુહાવીરઃ વાયુજસ્સમ્પ્રભાવનઃ ।
સુન્દરો બલવાન્ શાન્તઃ આઞ્જનેય નમોઽસ્તુ તે ॥ ૧૮॥

રામાનન્દ જયકર જાનકીશ્વાસદ પ્રભો ।
વિષ્ણુભક્ત મહાપ્રાજ્ઞ પિઙ્ગાક્ષ વિજયપ્રદ ॥ ૧૯॥

રાજ્યપ્રદસ્સુમાઙ્ગલ્યઃ સુભગો બુદ્ધિવર્ધનઃ ।
સર્વસમ્પત્તિદાત્રે ચ દિવ્યતેજસ્વિને નમઃ ॥ ૨૦॥

કલ્યાણકીર્તયે જયમઙ્ગલાય જગત્તૃતીયં ધવલીકૃતાય ।
તેજસ્વિને દીપ્તદિવાકરાય નમોઽસ્તુ દીપ્તાય હરીશ્વરાય ॥ ૨૧॥

મહાપ્રતાપાય વિવર્ધનાય મનોજવાયાદ્ભૂતવર્ધનાય ।
પ્રૌઢપ્રતાપારુણલોચનાય નમોઽઞ્જનાનન્દ કપીશ્વરાય ॥ ૨૨॥

કાલાગ્નિદૈત્યસંહર્તા સર્વશત્રુવિનાશનઃ ।
અચલોદ્ધારકશ્ચૈવ સર્વમઙ્ગલકીર્તિદઃ ॥ ૨૩॥

બલોત્કટો મહાભીમઃ ભૈરવોઽમિતવિક્રમઃ ।
તેજોનિધિઃ કપિશ્રેષ્ઠઃ સર્વારિષ્ટાર્તિદુઃખહા ॥ ૨૪॥

ઉદધિક્રમણશ્ચૈવ લઙ્કાપુરવિદાહકઃ ।
સુભુજો દ્વિભૂજો રુદ્રઃ પૂર્ણપ્રજ્ઞોઽનિલાત્મજઃ ॥ ૨૫॥

રાજવશ્યકરશ્ચૈવ જનવશ્યં તથૈવ ચ ।
સર્વવશ્યં સભાવશ્યં નમસ્તે મારુતાત્મજ ॥ ૨૬॥

મહાપરાક્રમાક્રાન્તઃ યક્ષરાક્ષસમર્દનઃ ।
સૌમિત્રિપ્રાણદાતા ચ સીતાશોકવિનાશનઃ ॥ ૨૭॥

રક્ષોઘ્નોઽઞ્જનાસૂનુશ્ચ કેસરીપ્રિયનન્દન ।
સર્વાર્થદાયકો વીરઃ મલ્લવૈરિવિનાશનઃ ॥ ૨૮॥

સુમુખાય સુરેશાય શુભદાય શુભાત્મને ।
પ્રભાવાય સુભાવાય નમસ્તેઽમિતતેજસે ॥ ૨૯॥

વાયુજો વાયુપુત્રશ્ચ કપીન્દ્રઃ પવનાત્મજઃ ।
વીરશ્રેષ્ઠ મહાવીર શિવભદ્ર નમોઽસ્તુતે ॥ ૨૯॥

ભક્તપ્રિયાય વીરાય વીરભદ્રાય તે નમઃ ।
સ્વભક્તજનપાલાય ભક્તોદ્યાનવિહારિણે ॥ ૩૦॥

દિવ્યમાલાસુભૂષાય દિવ્યગન્ધાનુલેપિને ।
શ્રીપ્રસન્નપ્રસન્નાય સર્વસિદ્ધિપ્રદોભવ ॥ ૩૧॥

વાતાત્મજમિદં સ્તોત્રં પવિત્રં યઃ પઠેન્નરઃ । વાતસૂનોરિદં
અચલાં શ્રિયમાપ્નોતિ પુત્રપૌત્રાદિવૃદ્ધિદમ્ ॥ ૩૨॥

ધનધાન્યસમૃદ્ધિં ચ આરોગ્યં પુષ્ટિવર્ધનમ્ ।
બન્ધમોક્ષકરં શીઘ્રં લભતે વાઞ્છિતં ફલમ્ ॥ ૩૩॥

રાજ્યદં રાજસન્માનં સઙ્ગ્રામે જયવર્ધનમ્ ।
સુપ્રસન્નો હનુમાન્મે યશઃશ્રી જયકારકઃ ॥ ૩૪॥

॥ ઇતિ શ્રીપરાશરસંહિતાયૈ પરાશરમૈત્રેયસંવાદે
હનુમત્સ્તવરાજઃ સમ્પૂર્ણઃ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

*Shri Hanumat StavarAja*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*